वकर्त्तनात् कुनखीत्यादि। कुनखी च श्राद्धकाले वर्ज्जनीयः यथाह मनुः “वर्ज्याःस्युर्हव्यकव्ययोः। प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः” । “दुर्वर्ण्णः कुनखी कुष्ठी मायावी कुण्डगोलकौ, वर्ज्जनीयाः प्रयत्नेन” भा०व० १९९। श्राद्धे वर्जनीयोक्तौ।

**कुनट** पु० कुत्सितं नटति—नट—अच्। १श्योनाकभेदे राजनि० गौरा०ङीष्। कुनटी २मनःशिलायाम् अमरः ३धन्याके राजनि०। कुत्सितोनटः कुग०स०। ४कुत्सिते नटे पु०।

**कुनलिन्** पु० ईषत् नलोऽस्त्यस्य इनि। वकवृक्षे त्रिका०। तस्य फलेषु ईषन्नलाकारत्वात्तथात्वम्।

**कुनह(ट)** पु० कूर्म्मविभागे वृह०सं० ऐशान्यामुक्ते १देशभेदे “ऐशान्यां मेरुकनष्टराज्येत्युपक्रमे “भल्लोपनीलजटासुरकुनह(ट)खसकुचिकाख्याः” इति तत्रोक्तत्वात्। कु+नह—अच्। २कुत्सितबन्धके त्रि०।

**कुनाथ** पु० कुत्सितोनाथः। १कुत्सितपालके। “कुनाथस्याजितात्मनो यथा सार्थस्य” भाग०५। १४। ४। “हतास्म्यहं कुनाथेन नपुंसा वीरमानिना” भाग० ९। १४। ४। कुपालककुपत्यादयोऽप्यत्र। कोनाथः। २महीनाथे राजनि पु०।

**कुनाभि** पु० ईषत् नाभिरिव आवर्त्तवत्त्वात्। १वातमण्डल्याम् (घूर्णीवाताय) त्रिका०। २निधिभेदे हेमच०।

**कुनामन्** त्रि० कुत्सितं प्रातरस्मरणीयं नामास्य। अतिक्रपणे स्त्रियां वा डाप् ङीप्। तस्यापत्यं बाह्वा० इञ्। कौनामि तदपत्ये पुंस्त्री०। तस्येदम् काश्या० ठञ्ञिठौ। कौनामिक तत्सम्बन्धिनि त्रि० ठञि स्त्रियां ङीप् ञिठि टाप् इदुच्चारणार्थः इति भेदः।

**कुनाशक** पु० ईषत् नाशयति स्पर्शनात् नश—णिच्—ण्वुल्। दुरालभायाम् यवासे (आलकुसी) अमरः।

**कुनिषञ्ज** पु० दशममनोः पुत्रभेदे। “दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः” इत्युपक्रमे “मनोः सुतौत्तमौजाश्च कुनिषञ्जश्च वीर्य्यवान्” हरिवं० ७अ०।

**कुन्च** वक्रणे अनादरे च भ्वा० पर० सक०सेट्। कुञ्चति अकुञ्चीत् चुकुञ्च चुकुच(ञ्च)तुः। कुञ्चनम् आ+सङ्कोचने आकुञ्चति संकोचयति। वि प्रसारणे। विकुञ्चति प्रसारयति सङ्कुचितः णिच् आकुञ्चितः “आकुञ्चितसव्यपादम्” भट्टिः।

**कुन्त** पु० कुं भूमिमित्तिमुनत्ति उन्द—बा० त शकन्ध्वा०। गवेधुकायां (गड़गड़े) १धान्यभेदे। २प्रासास्त्रे च मेदि०। ३क्षुद्रकीटभेदे (उकुन्) कुन्तलः। ४चण्डभावे विश्वः। कुन्तास्त्रलक्षणं हेमा० परिख० लक्षणसमुच्चये उक्तं यथा

“उक्ता कुन्तोत्पत्तिरनन्तरं कुन्तद्रव्यं वक्ष्यते वेणुर्वेत्रं विल्वश्चन्दनो वर्द्धनं शिशंपा खदिरोदेवदारुर्घण्टारोहश्चेति कुन्तस्य दण्डद्रव्याणि तत्र सप्तहस्तप्रमाणः श्रेष्ठः। षड्भिर्हस्तैर्मध्यमः। पञ्चहस्तश्च निकृष्टो भवति लोहस्याकारौ द्वौ भवतः एकं पुष्कलावर्त्तकं द्वितीयं चीनोत्थितं तत्तु तीक्ष्णं, यत्तु पुष्कलावर्तकं तल्लोहं मृदु। तयोस्त्रियं परीक्षा यत्ताडितं नदति तत्तीक्ष्णं यन्निःशब्दं तन्मृदु, निपाते यच्छिद्यते तत्तीक्ष्णं, यन्नमति तत्पुष्कलावर्त्तं मृदु। तत्र चीनोद्भवं भवत्यप्रशस्तं पुष्कनावर्त्तकमेव प्रशस्यते। कुन्तस्य फलं च मृदुना लोहेन कर्त्तव्यं तीक्ष्णेन लोहेन धारा कार्या तयोरलाभे शेषाणि लोहानि शोधयित्वा कुन्तफलं तैः कारयेत्। तत्र सप्तपर्ण्णशाकखर्जूरीवेत्रकरवीरवेणूनां तालफलकयोः केतक्याः स्नुह्या वा पत्राकारः कुशाग्रस्य सन्निभश्च। तथा कर्णसंस्थानं वा कर्त्तव्यं तच्च निर्व्रणं मनोदृष्टिहरन्तीक्ष्णं शुभञ्च श्रेष्ठं षोड़शाङ्गुलायामं, मध्यमं चतुर्द्दशाङ्गुलायाममधमं द्वादशाङ्गुलं भवति। अङ्गुलविस्तारं सार्द्धाङ्गुलविस्तारं द्व्यङ्गुलविस्तारञ्च क्रमाद्भवति। द्वियववैपुल्यं सार्द्धैकयववैपुल्यमेकयववैपुल्यञ्च। तत्र श्लोकाः। वेण्वादिद्रुमजातीनां कार्यो दण्डः स च त्रिधा। सप्तषट्पञ्चहस्तश्च उत्तमो मध्यमोऽधमः। तस्याकारौ च द्वौ स्यातां सचीनं पुष्कलं तथा। तत्रैकतीक्ष्णं लोहस्य द्वितीयं मृदुनस्तथा। तत् फलं मृदुलोहेन धारा तीक्ष्णेन कारयेत्। सप्तपर्णादिपत्राणां समाकारं फलं भवेत्। षोड़शाङ्गुलमायामोद्व्यङ्गुलश्चापि विस्तृतम्। यवद्वितयवैपुल्यं श्रेष्ठं कुन्तफलं भवेत्। मध्यमाधमयोर्हानिर्द्व्यङ्गुलार्द्धाङ्गुलं क्रमात्। आयामे विस्तृते वत्स! वैपुल्ये च यथाक्रमम्। सुशब्दत्वं मृदुगन्धत्वं सुपीनत्वं वर्ण्णपूजितत्वञ्चेति फलगुणाः। चम्पकोत्पलचन्दनागुरुपद्मोशीरपत्ररसानां सुगन्धिदानाम् भवति फलस्य गन्धसंपत्। तथा युक्तं फलमतिक्रम्यापि रूपं पूजितं भवति वसागन्धि मत्स्यगन्धि गोमूत्रगन्धि दुर्गन्धि च निन्दितं भवति। मधुरं यद्यथवाम्लं यत्कषायं भवति तल्लक्ष्मीप्रवर्द्धनं, यल्लवणं कटुकं तिक्तं वापि रूक्षं क्षयावहं तन्निर्द्दिशेत्। शब्दस्तु हिरण्यस्यालीशब्दवत् घण्टाशब्दवच्च प्रशस्तो, झर्झरीभिन्नपात्रशब्दवज्जरी